# 2.8. महाकाव्यं, गद्यकाव्यं, काव्यशास्त्रञ्च
## (Epic, Prose and Poetics)

**प्रश्नः 1. रघुवंशमहाकाव्यस्य सामान्यपरिचयं लिखत ।**

**उत्तरम्**–रघुवंशम् एकोनविंशति-सर्गात्मकम् एकं लालित्य-पूर्णं महाकाव्यम् अस्ति महाकवेः कालिदासस्य । अत्र रघोः वंशस्य कथा निबद्धा अस्ति । दशम-सर्गादारभ्य पञ्चदशसर्ग-पर्यन्तम् रामस्य कथा वर्णिताऽस्ति । तदुत्तरं रामवंश्यानां तत्तन्नृपाणां चरितान्युपन्यस्तानि । अन्तिमः सर्गः अग्निवर्णस्य राज्याभिषेकेण समं समाप्यते–

**तस्यास्तथाविधनरेन्द्रविपत्तिशोकाद्,**
**उष्णैर्विलोचनजलैः प्रथमाभितप्तः ।**
**निर्वापितः कनककुम्भमुखोज्झितेन,**
**वंशाभिषेकविधिना शिशिरेण गर्भः ॥**

कालिदासोऽग्निवर्णपरवर्तिनां राज्ञामपि वर्णनं चिकीर्षति स्म, परमसौ कालेन कवलीकृतः इत्येके । अन्ये पुनः कालिदासेन परतो अपि रघुवंशस्य सर्गाः लिखिताः, परन्तु ते न प्राप्यन्ते इत्याहुः । बहवस्तु कालिदासस्य अग्निवर्ण-समकालिकतया ग्रन्थस्य तत्पर्यन्ततां समर्थ्यन्ते । क्षेत्रेशचन्द्र-चट्टोपाध्यायस्तु स्वीये 'डेट आफ कालिदास' नामके निबन्धे रघुवंशमग्निवर्णावसानमेवाहुः, किञ्च ते इदमपि कथयन्ति यत् अग्निवर्णः शुंगवंश्य एव आसीद् यो ब्राह्मणेन मन्त्रिणा वासुदेवेन हतः ।

रघुवंशे येषां राज्ञां वर्णनानि सन्ति, तेषां रामायणवर्णित नृपैः सह भेदः आपतति, परन्तु वायुपुराण-वर्णित रामवंशा-वल्या सह रघुवंशवर्णित–रामवंशावली भूयसा सामञ्जस्यं धारयति ॥

**प्रश्नः 2. पद्यस्यास्य व्याख्या विधेया–**

**वागर्थाविव सम्पृक्तौ वागर्थप्रपिपत्तये ।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥1॥**

**उत्तरम्**–मङ्गलात्मकं पद्यमिदं महाकविकालिदासविरचितस्य "रघुवंशमहाकाव्यस्य" प्रथमसर्गात् उद्धृतमस्ति । पद्येऽस्मिन् "विघ्नविघाताय ग्रन्थादौ मङ्गलमाचरेत्" इति वचनात् कालिदासो रघुवंशमहाकाव्यम् आरभमाणः "वागर्थाविव"–इत्यनेन नमस्कारात्मक-मङ्गलम् विदधाति–

शब्दार्थयोः सम्यक् ज्ञानार्थं शब्दार्थौ इव नित्यसम्मिलितौ लोकस्य-पितरौ पार्वतीशङ्करौ वन्दे ।

यथा, शब्दः तस्यार्थश्च परस्पराभ्यां न पृथक्क्रियेते, अपितु सर्वदा परस्परं नित्यसम्बद्धौ तिष्ठतः, तथैव पार्वतीपरमेश्वरौ अपि न कदापि परस्परतो पृथगाश्रीयेते । अस्मात् हेतोः अहं कालिदासः तौ अभिवादये, येनाहं शब्दार्थयोः सम्यक् ज्ञानं प्राप्नुयाम् ।

**विशेषः**–(1) **अलङ्कारः**–पद्येऽस्मिन् पार्वतीपरमेश्वरयोः शब्दार्थाभ्यां समता प्रदर्शितत्वात् उपमालङ्कारः "साधर्म्यमुपमा-भेदे" इति लक्षणात् ।

(2) **समासः**–(i) वागर्थाविव–वागर्थौ इव (केवलसमासः)

(ii) पितरौ–माता च पिता च एकशेष–द्वन्द्वः ।

(iii) पार्वतीपरमेश्वरौ–पार्वती च परमेश्वरश्च इतरेतर-द्वन्द्वः ।

(3) **प्रसादगुणः**

(4) **अनुष्टुप् छन्दः ।**

**प्रश्नः 3. पद्यमिदं व्याख्येयम्–**

**क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।**
**तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥2॥**

**उत्तरम्**–श्लोकोऽयं श्रीकालिदासप्रणीतस्य "रघुवंश" महाकाव्यस्य प्रथमसर्गात् संगृहीतम् । अत्र अतिशयविनय-भावेन असमर्थतां प्रतिपादयति महाकविः–

सूर्याज्जायमानः रघुवंशकुलं कुत्र ? अल्पपदार्थग्रहणसमर्था मदीया बुद्धिः कुत्र ? अज्ञानवशात् लघुनौकया दुर्गमसागरम् अवतरितुमिच्छुः अस्मि, । अर्थात् मम अल्पबुद्ध्या सूर्यवंश-वर्णनम् अल्पनौकया दुस्तरसमुद्रतरणसदृशमिव ।

प्लवेन यथा दुस्तरसागरस्यावतरणं दुष्करं भवति, तथैव अल्पज्ञानाद् रघुवंशकथावर्णने असमर्थोऽहं कालिदासः । इतिभावः ।

**विशेषः**–(1) **अलङ्कारः**–(i) अत्र उपमानोपमेयभावस्य कल्पनया निदर्शनालङ्कारः ।

(ii) विषमालङ्कारश्च ।

(2) **समासः**–(i) सूर्यप्रथवः = प्रभवति अस्मात् इति प्रभवः, सूर्यः प्रभवः यस्य सः (बहु.)

(ii) अल्पविषया–अल्पः विषयः यस्याः सा । (बहु.)

Scanned with OKEN Scanner